
## त्रयोदशः पाठः


# सङ्ख्यागणना ननु सरला

0672CH13





एक: सूर्य: चन्द्रोऽप्येक:
मानवकुलमप्येकम् ।
द्वे नयने ननु जीविनि सकले
प्रभवति सर्वो द्रष्टुम् ॥





लोकशङ्करस्त्रिनयनमूर्ति:
नमाम्यहं तं प्रतिदिवसम् ।
चतुर्मुखोऽयं जगत: स्रष्टा
तेन हि सृष्टं जीवकुलम् ॥





पञ्चाङ्गुलयो मम करकमले
लोको विदधति गणनाम् ।
सुरसेनानी: षण्मुखदेव:
सततं पात्ययममरगणम् ॥








सप्त वासरा: सप्ताहे ननु
स्वरा: सुमधुरा: सप्त ।
ऊर्ध्वमधस्तात् लोका: सप्त
ख्याता ऋषय: सप्त ॥




© NCERT not to be republished




अष्ट दिग्गजा धरन्ति धरणीम्
उपकृतिशीला अतुलबला: ।
नव ग्रहा ननु विपुले गगने
चरन्ति सततं नियततया ॥





गृहस्य दश दिशा:
पूर्वदिशा , पश्चिमदिशा ,
उत्तरदिशा , दक्षिणदिशा ,
ईशानदिशा , आग्नेयदिशा ,
नैर्ऋत्यदिशा, वायव्यदिशा ,
ऊर्ध्वम् , अध:



पूर्वाद्या दश दिश: प्रसिद्धा:
सङ्ख्यागणना ननु सरला ।
गायामो वयममितामोदं
कुर्मो बहुधा करतालम् ॥

*डा. जनार्दनहेगडे*

## वयं शब्दार्थान् जानीम:

| शब्द: | अर्थ: | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| जीविनि | जीवे | प्राणी में | In the living being | |
| स्रष्टा | सृष्टिकर्ता ब्रह्मा | सृष्टिकर्ता ब्रह्मा | Creator of universe | |
| करकमले | हस्तारविन्दे | कमल जैसे हाथ में | In the lotus like hand | |
| विदधति | कुर्वन्ति | करते हैं | Are doing | |
| गणनाम् | गणनम् | गिनती | Counting | |
| सुरसेनानी: | कार्तिकेय: | देवों के सेनापति (कार्तिकेय) | Commander-in -chief of Gods | |
| पाति | रक्षति | रक्षा करता है | Protects | |
| सप्ताहे | दिवससप्तके | सप्ताह में | In a week | |

© NCERT not to be republished

| शब्द: | अर्थ: | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| ऋषय: | मुनय: | ऋषि-गण | Sages | |
| ऊर्ध्वम् | उपरि | ऊपर | Above | |
| अध: | निम्नभागे | नीचे | Below | |
| उपकृतिशीला: | उपकार-स्वभावा: | उपकार स्वभाववाले | Those who are of helpful nature | |
| अतुलबला: | अतुल्यशक्ति-सम्पन्ना: | अतुलनीय बलवाले | Extraordinarily strong | |
| नियततया | नियमितरूपेण | नियमित रूप से | Continuously | |
| दिश: | दिशा: | दिशाएँ | Directions | |
| अमितामोदं | अत्यानन्दपूर्वकम् | अति आनन्दपूर्वक | With Great/ limitless delight | |
| करतालम् | करतलध्वनि: | ताली | Clap | |

## वयं संख्यां गणयाम: (१ - ५०)

| | | | | |
|---|---|---|---|---|
| १ – एकम् | ११ – एकादश | २१ – एकविंशति: | ३१ – एकत्रिंशत् | ४१ – एकचत्वारिंशत् |
| २ – द्वे | १२ – द्वादश | २२ – द्वाविंशति: | ३२ – द्वात्रिंशत् | ४२ – द्विचत्वारिंशत् |
| ३ – त्रीणि | १३ – त्रयोदश | २३ – त्रयोविंशति: | ३३ – त्रयस्त्रिंशत् | ४३ – त्रिचत्वारिंशत् |
| ४ – चत्वारि | १४ – चतुर्दश | २४ – चतुर्विंशति: | ३४ – चतुस्त्रिंशत् | ४४ – चतुश्चत्वारिंशत् |
| ५ – पञ्च | १५ – पञ्चदश | २५ – पञ्चविंशति: | ३५ – पञ्चत्रिंशत् | ४५ – पञ्चचत्वारिंशत् |
| ६ – षट् | १६ – षोडश | २६ – षड्विंशति: | ३६ – षट्त्रिंशत् | ४६ – षट्चत्वारिंशत् |
| ७ – सप्त | १७ – सप्तदश | २७ – सप्तविंशति: | ३७ – सप्तत्रिंशत् | ४७ – सप्तचत्वारिंशत् |
| ८ – अष्ट | १८ – अष्टादश | २८ – अष्टाविंशति: | ३८ – अष्टात्रिंशत् | ४८ – अष्टचत्वारिंशत् |
| ९ – नव | १९ – नवदश | २९ – नवविंशति: | ३९ – नवत्रिंशत् | ४९ – नवचत्वारिंशत् |
| १० – दश | २० – विंशति: | ३० – त्रिंशत् | ४० – चत्वारिंशत् | ५० – पञ्चाशत् |

© NCERT not to be republished

# वयम् अभ्यासं कुर्मः

**१. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् एकपदेन उत्तराणि लिखन्तु।**

(क) कः एकः अस्ति ?

(ख) कः षण्मुखदेवः अस्ति ?

(ग) कः त्रिनयनमूर्तिः अस्ति ?

(घ) का सरला अस्ति ?

(ङ) के अतुलबलाः सन्ति ?

**२. उदाहरणानुगुणं शब्दानां पुरतः उचितां संख्यां लिखन्तु।**

**यथा** - आकाशे ..........१.......... सूर्यः विभाति। (१, २, ३, ४)

(क) मम हस्ते .............................. अङ्गुलयः सन्ति। (९, ५, ८ , ७)

(ख) सप्ताहे .............................. वासराः भवन्ति। (६ , १० , ७ , ५)

(ग) कार्तिकेयस्य .............................. मुखानि सन्ति। (१, ६, १०, ३)

(घ) व्याकरणे .............................. वचनानि सन्ति। (१०, ९, ३, ५ )

(ङ) गगने .............................. ग्रहाः सन्ति। (८, ७, ९, १० )

**३. उदाहरणानुसारं सङ्ख्यां सङ्ख्यापदं च लिखन्तु।**

**यथा** - भवतः परिवारे कति जनाः सन्ति ? .....५....., (.......पञ्च.......)।

(क) कति दिशः सन्ति ? ............, (..........................)।

(ख) सप्ताहे कति वासराः भवन्ति ? ............, (..........................)।

(ग) वर्षे कति मासाः भवन्ति ? ............, (..........................)।

(घ) भवतः कति दन्ताः सन्ति ? ............, (..........................)।

(ङ) स्वराः कति भवन्ति ? ............, (..........................)।

© NCERT not to be republished


४. अध: प्रदत्तेन पदेन सह सङ्ख्यां योजयन्तु ।

| | अ | ब |
|---|---|---|
| (क) | पञ्च | २० |
| (ख) | एकम् | १३ |
| (ग) | अष्ट | ५ |
| (घ) | विंशति: | १ |
| (ङ) | त्रयोदश | ८ |

५. उपस्थितिपत्रं पश्यन्तु । संख्यां वदन्तु लिखन्तु च ।



| उपस्थिति-क्रमसंख्या | नाम |
|---|---|
| १ – एकम् | गणेश: |
| २ – द्वे | गीताञ्जलि: |
| ३ – त्रीणि | जगन्नाथ: |
| ४ – चत्वारि | दिनेश: |
| ५ – पञ्च | प्रज्ञा |
| ६ – षट् | बलराम: |
| ७ – सप्त | मोहन: |
| ८ – अष्ट | राधिका |
| ९ – नव | सुभद्रा |
| १० – दश | स्वयंप्रभा |



(क) गणेशस्य उपस्थितिसंख्या का ? ........................

(ख) सुभद्राया: उपस्थितिसंख्या का ? ........................


(ग) स्वयंप्रभाया: उपस्थितिसंख्या का ? ........................

(घ) जगन्नाथस्य उपस्थितिसंख्या का ? ........................


(ङ) गणेशस्य उपस्थितिसंख्या का ? ........................

© NCERT not to be republished

६. चित्रं पश्यन्तु, संख्याः वदन्तु, द्वितीयचित्रे अङ्कैः च ताः संख्याः लिखन्तु ।




७. चित्रं पश्यन्तु, संख्याः वदन्तु, द्वितीयचित्रे शब्दैः च ताः संख्याः लिखन्तु ।




© NCERT not to be republished

## योग्यताविस्तरः

### संख्याप्रसिद्धिः

एकम् – एकं ब्रह्म

द्वे – द्वे अयने (उत्तरायणम्, दक्षिणायनम्)

त्रीणि – त्रीणि वचनानि (एकवचनम्, द्विवचनम्, बहुवचनम्)

चत्वारि – चत्वारि युगानि (कृतयुगम्, त्रेतायुगम्, द्वापरयुगम्, कलियुगम्)

पञ्च – पञ्च अङ्गानि (तिथिः, वासरः, नक्षत्रम्, योगः, करणम्)

षट् – षट् रसाः (मधुरः, अम्लः, लवणः, कटुः, तिक्तः, कषायः)

सप्त – सप्त ऋषयः (मरीचिः, अत्रिः, अङ्गिराः, पुलस्त्यः, पुलहः, क्रतुः, वसिष्ठः)

अष्ट – अष्ट दिक्पालाः ( इन्द्रः, अग्निः, यमः, निर्ऋतिः, वरुणः, वायुः, कुबेरः, ईशानः)

नव – नवग्रहाः (सूर्यः, चन्द्रः, मङ्गलः, बुधः, गुरुः, शुक्रः, शनिः, राहुः, केतुः)

दश – दश दिशाः (पूर्वदिशा, पश्चिमदिशा, उत्तरदिशा, दक्षिणदिशा, आग्नेयकोणः, नैर्ऋत्यकोणः, वायव्यकोणः, ईशानकोणः, ऊर्ध्वम्, अधः)

## गतिविधि-कार्यम्

### संख्यागीतम्


एकं द्वे, एकं द्वे। पश्यत किमस्ति मम हस्ते।
त्रीणि चत्वारि, त्रीणि चत्वारि। हस्ते पात्रं, पात्रे वारि।
पञ्च षट्, पञ्च षट्। जम्बीररसं योजयत।
सप्त अष्ट, सप्त अष्ट। लवणं गुडं च मेलयत।
नव दश, नव दश। शनैः शनैः मन्थयत॥



© NCERT not to be republished

## परियोजना-कार्यम्

चित्रे रिक्तस्थलेषु अङ्कैः संख्यां लिखन्तु।




not to be republished © NCERT